International Journal of Sanskrit Research 2024; 10(1): 07-09

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(1): 07-09
© 2024 IJSR
www.anantaajournal.com
Received: 05-11-2023
Accepted: 07-12-2023

**सुभद्रा मणिः वारिक्**
शोधछात्रा,
महाराजाश्रीरामचन्द्रभञ्जदेओ विश्वविद्यालयः, वारिपदा, ओडिशा, भारत

**Corresponding Author:**
**सुभद्रा मणिः वारिक्**
शोधछात्रा,
महाराजाश्रीरामचन्द्रभञ्जदेओ विश्वविद्यालयः, वारिपदा, ओडिशा, भारत

# संस्कृतसाहित्यविकाशधारायां क्षेमेन्द्रस्य काव्यकलानैपुण्यम्

## सुभद्रा मणिः वारिक्

**सारांश**
संस्कृतभाषायां यथा सर्वेषां मनुष्याणां जीवनचरितं मानवसभ्यतायाः संस्कृतेश्च तथ्यं सकलं निहितमस्ति।तथैव प्रतिदिनं जन्मादारभ्य मरणं यावत् गर्भाधानजातसंस्कारादिकं मरणावस्थायामपि शौचसंस्कारादि कर्माणि जीवनयात्रायां यानि प्रयोजनीय तथ्यानि सन्ति तानि सर्वाणि संस्कृतभाषायां विलसन्तीति । प्रायसः पञ्चसहस्रवर्षेभ्यः पुरा वेद – वेदाङ्ग – काव्य – पुराण – प्रभृतिभिः संस्कृतभाषा विश्वस्य गौरवमयं महत्वं निर्वहन्ती प्रकामं विद्योतते । तत्र वैदिकसाहित्यस्य गौरवोपरि चेत् द्रुगपातः विधीयते । तर्हि एतद् वक्तुं शक्यते यत् संस्कृते साहित्यस्वरुपं वैदिकवाङ्कमयमहत्वपुर्णसंहिता - व्राह्मण - आरण्यक - उपनिषद्प्रभृतिभिः तथा शिक्षा - कल्प - छन्द - निरूक्त - ज्योतिषषडङ्गैः वर्द्धितं सुसमृद्धं संस्कृतम् । तत्र वाल्मीकिरामायणे निगदितम् –

यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् ।
रावणं मन्यमाना मां सीता भीता भविष्यति ।। १।।

अत्र लक्ष्यते - हनुमान् स्वमनसि जल्पति यत् चेदहं द्विजातिवत् साधुसंस्कृतं ब्रुयां तर्हि सीता मां रावणं मत्वा विभियात् ।
संस्कृतभाषायाः गौरवं विश्वेप्रतिष्ठापयितुं वहवः प्रयासः सम्प्रतिः संलक्ष्यन्ते।
संस्कृतसाहित्यप्रामुख्येन द्विधा विभज्यते। यथा –वैदिकभागः काव्यभागश्च ।
पाश्चात् विदुषां मध्ये माक्समुलर् History of anniciant sanskrit literature.

प्राचीनसंस्कृतसाहित्यस्य इतिहास इति ग्रन्थं रचितवान् यत्र तु संस्कृतभाषायाः पुर्णाङ्गस्वरूपं नैव लिपिवद्धमपितु वैदिकसाहित्यसम्वन्धे सविशेषतथ्यमुपाश्रितम् ।

**कूटशब्दाः** साहित्यम्, रामायणम्, काव्यसौन्दर्यम्

## प्रस्तावना

**रामायणभेदाः** संस्कृतसाहित्ये रामायणमादिमहाकाव्यरूपेण सुविख्यातम् । यस्य महाकाव्यस्य प्रारम्भः महर्षिवाल्मीकिः शोकसन्तप्तहृदयनिसृतभावप्रवणवाक्विलासेन संजात इति। यथा -

मां निषाद प्रतिष्ठा त्वमागमः शाश्वतीः समाः ।

यत्क्रौचमिथुनादेकमवधीः काममोहितम् ।।२।।

वाल्मीकिरामायणे चतुर्विंशतिसहस्रश्लोकाः सन्ति । तथाच सप्तकाण्डानि विद्यन्ते ।

यथा – १.वालकाण्डम्, २.अयोध्याकाण्डम्, ३.अरण्यकाण्डम्, ४. किष्किन्धाकाणडम्
५. सुन्दरकाण्डम्, ६.लङ्काकाण्डम्, ७. उत्तरकाण्डम् ।

रामायणस्य रचनाकालः ख्री.पू.पञ्चमशताब्दी मन्यते । तत्र बौद्धसाहित्यस्य तथा
जैनसाहित्यस्य अनुशीलनात् समीक्षकैरुक्तं यत् रामायणस्य रचना
बौद्धसाहित्यरचनातः पूर्वं नाम पञ्चमशताब्दी इति वक्तुं शक्यते । रामायणस्य रचना
पाणिनेः पूर्वमिति वक्तुं शक्यते । यतः लौकिकसंस्कृतं नियमयितुं पाणिनिना
अष्टाध्यायी प्रणिता । यदा पाणिनेः समयः ख्री.पू. चतुर्थशतकम् परन्तु रामायणस्य
समयः पञ्चमशताब्दीत्वात् रामायणं पाणिनिः पूर्ववर्त्ती इति । षडोषशताब्द्यां
तुलसीदास विरचितं तुलसीरामायणं वाल्मीकि रामायणमुपजीव्य रचयितमिति स्पष्टं प्रकटितम्।

नानापुराण निगमागमसम्मतं यत् ।
रामायणे निगदितं क्वचिदन्यतोऽपि।।
स्वान्तः सुखाय तुलसी रघुनाथगाथा ।
भाषानिवद्धमतिमञ्जुलमाततनोति ।।३।।

रामायणमाश्रित्य वहुसंख्यकटीकाः तथा अनेके रामायणग्रन्थाः विरचिताः । यथा -

१. योगवशिष्ठः
२. अध्यात्मरामायणम्
३. अद्भुतरामायणम्
४. आनन्दरामायणम्
५. तत्वसंग्रहरामायणम्
६. भूषुण्डिरामायणम्
७. मन्त्ररामायणम्
८. रामलिङ्गामृतम्
९. राघवोल्लासः
१०. उदात्तराघवः

वाल्मीकि प्रणीतरामायणं महाकाव्यरूपेण सर्वजनसुविदितं विद्यते । तत्र अलंकार – ध्वनि – रस – गुण – रितिप्रभृतिविभावैः काव्यमिदं विभूषितम्। तत्र प्रकृतिवर्णनाप्रसङ्गे कविना लिखितम् –

प्रकृत्या हिमकोणाड्यो दूरसूर्याश्च सांप्रतम्।
यथार्थनामा सूव्यक्तं हिमवान् हिमवान् गिरिः।।
रविसंक्रान्तसौभाग्यः तुषारवृतमण्डलः।
निःश्वासान्धइवादर्शशचन्द्रमा न प्रकाशते ।।

**कथासाहित्ये रामकथा**

कथासाहित्येगुणाढ्यवृहत्कथा,बधस्वामीकृतवृहत्कथाश्लोकसंग्रहः,आचार्यक्षेमेन्द्रस्य
वृहत्कथामञ्जरी संक्षिप्तः रामकथा वर्णिता दृश्यते ।सोमदेवकृतसाहित्यस्य
शिरमणिग्रन्थकथासरित्सागरः, वासुदेवहिण्डि पञ्चविंशशताब्दी एकवृहत्कथा वा
एकप्राकृतसस्करणरामकथा वर्णना दृश्यते ।

**आधुनिकः भारतीयभाषासु रामकथाः**

| रचयिता | ग्रन्थः | समयः | भाषा |
|---|---|---|---|
| कंब | कंबरामायण | १२शताब्दी | तामिल।१। |
| रंगनाथ | रंगनाथरामायण | १३शताब्दी | तेलगु |
| भास्कर | भास्कररामायण | १४शताब्दी | तेलगु |
| राम | रामचरित | १४शताब्दी | मालायलम् |
| पुनमनंपूतिरि | रासायणचम्पू | १५शताब्दी | मालायलम् |
| अय्यिपिफ्लै | रामकथापाटु | | मालायलम |
| कविराजमार्ग | रामायण | ८५०शतक | कन्नड |
| नृपतुङ्ग | भूवनैक्यरामाभ्युदय | ८५०शतक | कन्नड |
| नागचन्द्र | पम्परामायण | ११००-१२०० | कन्नड |
| हरिदास | मूलवालरामायण | १७५० | कन्नड |
| रामकृष्णराव | श्रीरामचरित्र | १८१६ | कन्नड |
| सारलादास | तुलसीरामायण | १५शताब्दी | ओडिआ |
| वलरामदास | जगमोहनरामायण | १६शताब्दी | ओडिआ |

| | | | |
|---|---|---|---|
| शिद्धेश्वरदास | विलङ्कारामायण | १७००शतक | ओडिआ |
| धनञ्जयभञ्ज | रघुनाथविलास | | ओडिआ |
| शंकरदास | वारमासीकोइलि | | ओडिआ |
| उपेन्द्रभञ्ज | रामलीलामृत | | ओडिआ |
| भूवनेश्वरकविचन्द्र | सीतेशविलास | | ओडिआ |
| ईश्वरदास | रामलीला | | ओडिआ |
| प्रकाशभट्ट | काश्मीरीरामायण | | ओडिआ |

संस्कृतसाहित्ये महाकाव्यानामुपरि विविधलक्षणं परिदृश्यते। तत्र भामहविरचितः काव्यालङ्कारे, दण्डीकृतकाव्यादर्शे, अग्निपुराणे, रूद्रटविरचितकाव्यालङ्कारे, तथा विश्वनाथविरचितसाहित्यर्दपणादिषु महाकाव्यस्य वर्णनात्मकलक्षणं प्रदतः।
महाकाव्यलक्षणे किमपि महत्वपूर्णं तथ्यमस्ति । तत्र कथानकं नायकः तथा रसानावलम्ब्य लक्षणं विद्यते । कथानकं दृष्ट्या महाकाव्ये किमपि प्रसिद्धघटणा तथा ऐतिहासिकघटणा व्यजते । ध्वन्यालोके आनन्दवर्द्धनेन अलङ्कारस्य निर्देशः विहितः। यथा -

रसक्षिप्ततया यस्य वन्धः शक्यक्रियो भवेत् ।
अपृथग्यत्ननिर्वत्यः सोऽलङ्कारो ध्वनौ मतः।।४।।

अस्यायमभिप्रायः रसादि ध्वनिषु यस्य अलङ्कारस्य रचना रसद्वारा आक्षिप्तं न भृत्वा प्रयत्नान्तरेण भवति । तदैव अलङ्कारमान्यः चेत् एतत् न जायते ।

**उपसंहारः**

संस्कृतसाहित्ये लक्ष्यशास्त्र – लक्षणशास्त्ररूपेण विभागद्वयं दृश्यते ।
लक्ष्यशास्त्ररूपेण वेद – वेदान्त – रामायण – महाभारत – भागवत – कालिदास – माघ- भारवि – दण्डीप्रभृतिकविना काव्यशास्त्रं वुध्यते ।परन्तु नाट्यशास्त्राणि मोनरञ्जकतया प्रतिपादितत्वात् लक्षणशास्त्रमुच्यते । काव्यमीमांसाकारराजशेखरस्य मते –

उपकारकत्वादलंकारः सप्तमङ्गमिति यायावरीयः।
ऋते च तत् स्वरूपा परिज्ञानाद् वेदार्थावगतिः ।।

राजशेखरमते चतस्रः प्रसिद्धविद्याः यथा – तर्क-त्रयी-वार्ता-दण्डनीतिः । राजशेखरमते –
पञ्चमी साहित्यविद्या इति यायावरीयः
सा हि चतसृणामपि विद्यानां निस्यन्दः ।।५।।

आलंकारिकप्राधान्यदृष्ट्या वामनः कथयति –“सौन्दर्यालङ्कारः;काव्यं ग्राह्यमलंकारात्”।
अलंकारशास्त्रस्य प्राचीनतादृष्ट्या राजशेखरेण उल्लिखितः ।यथा -
तत्र कविरहस्यं सहस्राक्षं,सामम्नासीत्, औक्तिकमुक्तिगर्भः, रीतिनिर्णयं, सुवर्णनाभः,
अनुप्रासिकं प्रचेतायनः यमकानि चित्रं चित्राङ्गदः, शब्दश्लेषं शेषः, वास्तवं पुलप्त्यः,
औपम्यमौपकायनः, अतिशयंपारशरः, अर्थश्लेषमुतत्थ्यः, उभयालंकारिकं कुवेरः,
वैनादिकं कामदेवः,रूपकानिरूपणीयं भरतः,रसाधिकारिकं नान्दिकेश्वरः, दोषाधिकारिकं धीषणः, गुणौपादानिकमुपमन्युः, औपनिषदिकं कुचुमार इति ।
मया यथामति निबन्धेऽस्मिन् क्षेमेन्द्रस्य काव्यकलानैपुर्ण्यं वर्णितं विद्यते यत्
विदूषां साहित्यपिपासूनां कृते महदुपकाराय भूयादिति आशासे ।

**सन्दर्भ**


1. वाल्मीकिरामायणम्-५-३०
2. रामायणम्
3. तुलसीरामायणम्
4. ध्वन्यालोकः -२-१६
5. काव्यमीमांसा